जानातीति तस्य तथात्वम् । २तद्धेतुभूतविहितकर्माग्नि-होमादिनिषिद्धकर्महिंसादिवेत्तरि च ।

**धर्माधिकरण** न० धर्मोऽधिक्रियतेऽत्र अधि+कृ—आधारे ल्युट् । नृपाणां तन्नियुक्तानाञ्च व्यवहारदर्शनयोग्ये १स्थानभेदे । तत्स्वरूपभेदादिकं वीरमि० उक्तं यथा बृहस्पतिः “दुर्गमध्ये गृहं कुर्य्याज्जलवृक्षान्वितं पृथक् । प्राग्दिशि प्राङ्मुखीन्तस्य लक्षण्याङ्कल्पयेत्सभाम् । माल्यधूपासनोपेतां वीजरत्नसमन्विताम्” । लक्षण्यां वास्तुशास्त्रोक्तलक्षणेन तु लक्षिताम् । सभायां धर्माधिकरणत्वं च “धर्मशास्त्रानुसारेण अर्थशास्त्रविवेचनम् । यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति” उक्तेः । तत्र सभ्योपवेशनमाह मनुः “यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः । राज्ञश्चाधिकृतोविद्वान् ब्राह्मणस्तां सभां विदुरिति” त्रय इत्युपलक्षणम् “अधिकानामपि स्मृतत्वात् । तच्च वक्ष्यते । अधिकृतो विद्वान् प्राड्विवेकः । अत्र “सभामेव प्रविशेत्” इत्यादिवचनात् सभा मुख्यं व्यवहारदर्शनस्थानम् । अन्यान्यमुख्यानि नानावचनादवगन्तव्यानि “देशस्थानानि वादानां पञ्च चैवाब्रवीद्भृगुः । निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः । आरण्यास्तु स्वकैः कुर्य्युः सार्थिकाः सार्थिकैस्तथा । सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः । उभयानुमतञ्चैव गृह्यते स्थानमीप्सितम् । कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः । ग्रामपौरगणश्रेण्यश्चातुर्विद्याश्च वर्गिणः । कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथेति” स्वकैरारण्यकैः ग्रामेऽपीत्यपिशब्दात् ग्रामेऽरण्यादौ च निवसन्ति ते उभयवासिभिर्निर्णयं कुर्य्युरुभयव्यवहाराभिज्ञत्वात्तेषाम् । कुलिकाः कुलश्रेष्ठाः । सार्थो ग्रामदेवयात्रादौ मिलितो जनसङ्घः तन्मुख्याः सार्थवाहादयः । पुरं मुख्यनगरम् । तस्मादर्वाचीनो ग्राम इति पुरग्रामनिवासिनोर्भेदः । कुलिकादीनि पञ्च स्थानानि तानि चारण्यकादीनामेव ग्रामादीनि दश स्थानानि साधारणानि । ग्रामो ग्रामाकारेणावस्थितोजनः । पौरः पुरवासिनां समूहः । श्रेण्यो रजकाद्या हीनजातयः । चातुर्विद्यः आन्वीक्षिक्यादिविद्याचतुष्टयोपेतः । वर्गिणो गणप्रभृतयः” । तत् अर्हत्वेनास्त्यस्य अच् । २तत्र नियुक्ते प्राड्विवेकादौ पु० “समः शत्रौ च मित्रे च सर्वशास्त्रविशारदः । विप्रमुख्यः कुलीनश्च धर्माधिकरणो भवेत्” मत्स्यपु० “पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः । धर्माधिकरणे कार्य्या जनाह्वानकरानराः इति मत्स्यपु० ।

**धर्माधिकरणिन्** पु० धर्माधिकरणं नियोगस्थानतयाऽस्त्यस्य इनि । विचारके प्राड्विवेकादौ धर्माध्यक्षे हेमच० ।

**धर्माधिकारिन्** पु० धर्मं व्यवहारे तन्निर्णयमधिकरोति अधि+कृ—णिनि ६त० । प्राड्विवेकादौ ।

**धर्माध्यक्ष** पु० धर्मे व्यवहारे धर्मनिर्णये अध्यक्षः । १प्राड्विवेकादौ । “कुलशीलगुणोपेतः सर्वकर्मपरायणः । प्रवीणः प्रेषणाध्यक्षो धर्माध्यक्षोऽभिधीयते” चाणक्यः । २विष्णौ च “लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः” विष्णुस० । “धर्माधर्मौ साक्षादीक्षते तदनुरूपं फलं दातुं तस्माद्धर्माध्यक्षः” भा० । अत्र धर्मपदं लक्षणया धर्माधर्मपदं तदभिप्रायेण धर्माधर्मौ इत्युक्तम् ।

**धर्मान्धु** पु० धर्मकृतोऽन्धुः कूपः । तीर्थभेदे स्कन्दपु० ।

**धर्माभास** पु० धर्म इवाभासते आ+भास—अच् । श्रुतिस्मृतीतरशास्त्रोक्ते असद्धर्मे । “श्रुतिस्मृतिभ्यामुदितोयः स धर्मः प्रकीर्तितः । अन्यशास्त्रेषु यः प्रोक्तो धर्माभासः स उच्यते” देवीभागवतम् ।

**धर्मारण्य** न० तीर्थभेदे तदाविर्भवकथा वराहपु० यथा “स धर्मः पीड़ितः सर्वः सोमेनाद्भुतकर्मणा । तारां जिह्वता पत्नीं भ्रातुराङ्गिरसस्य च । सोऽप्ययाङ्कोपितस्तेन बलिना क्रूरकर्मणा । अरण्यं गहनं घोरं प्रविवेश तदा प्रभुः” ब्रह्मोवाच । “यस्मादरण्यमिदं धर्म ! त्वयाव्याप्तं चिरं विभो ! । नाम्ना भविष्यति ह्येतद्धर्मारण्यमिति प्रभो !” गयास्थे २तीर्थभेदे “प्रथमेऽह्नि विधिः प्रोक्तो द्वितीयदिवसे व्रजेत् । धर्मारण्यं तत्र धर्मो यस्मात् यज्ञमकारयत्” वायुपु० गयामाहात्म्ये “गया च फल्गुतीर्थञ्च धर्मारण्यं सुरैर्वृतम् । तथा देवनदी पुण्या सरश्च ब्रह्म निर्मितम्” भा० आनु० १६५ अ० । ३धर्मसाधने अरण्यमात्रे च “तैरुक्तो यक्षियान् देशान् धर्मारण्यं तथैव च” भा० आश्व० ९२ अ० । वृ० स० १४ अ० कूर्मविभागोक्ते मध्यभागस्थे देशभेदे न० ४माथुरकोपज्योतिषधर्मारण्यानि शूरसेनाश्च” इत्युपक्रमे मध्यमिदमित्युक्तम् ।

**धर्मासन** न० धर्मार्थं धर्मविचारार्थमासनम् । विचारनिर्णयार्थे आसनभेदे । “धर्मासनमधिष्ठाय संवीताङ्गः समाहितः” मनुः ।

**धर्मास्तिकाय** पु० आर्हतमतसिद्धे जीवाजीवधर्माधर्म-